# Ashta-Laxmi Stotra

# અષ્ટલક્ષ્મીસ્તોત્રમ્

## Document Information

Text title : Ashta-Laxmi Stotra

File name : ashtalaxmistotra.itx

Category : aShTaka, devii, lakShmI, devI

Location : doc_devii

Author : Unknown

Transliterated by : Suprabha Pavuluri

Proofread by : Sunder Hattangadi

Description-comments : Hymn in praise of Laxmi, in her 8 forms

Latest update : Nov. 12, 1999

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# અષ્ટલક્ષ્મીસ્તોત્રમ્

॥ આદિલક્ષ્મી ॥

સુમનસવન્દિત સુન્દરિ માધવિ
ચન્દ્ર સહોદરિ હેમમયે ।
મુનિગણમણ્ડિત મોક્ષપ્રદાયિનિ
મઞ્જુળભાષિણિ વેદનુતે ॥

પઙ્કજવાસિનિ દેવસુપૂજિત
સદ્ગુણવર્ષિણિ શાન્તિયુતે ।
જયજય હે મધુસૂદન કામિનિ
આદિલક્ષ્મિ સદા પાલય મામ્ ॥ ૧॥

॥ ધાન્યલક્ષ્મી ॥

અહિકલિ કલ્મષનાશિનિ કામિનિ
વૈદિકરૂપિણિ વેદમયે ।
ક્ષીરસમુદ્ભવ મઙ્ગલરૂપિણિ
મન્ત્રનિવાસિનિ મન્ત્રનુતે ॥

મઙ્ગલદાયિનિ અમ્બુજવાસિનિ
દેવગણાશ્રિત પાદયુતે ।
જયજય હે મધુસૂદન કામિનિ
ધાન્યલક્ષ્મિ સદા પાલય મામ્ ॥ ૨॥

॥ ધૈર્યલક્ષ્મી ॥

જયવરવર્ણિનિ વૈષ્ણવિ ભાર્ગવિ
મન્ત્રસ્વરૂપિણિ મન્ત્રમયે ।
સુરગણપૂજિત શીઘ્રફલપ્રદ
જ્ઞાનવિકાસિનિ શાસ્ત્રનુતે ॥

ભવભયહારિણિ પાપવિમોચનિ
    સાધુજનાશ્રિત પાદયુતે ।
જયજય હે મધુસૂદન કામિનિ
    ધૈર્યલક્ષ્મિ સદા પાલય મામ્ ॥ ૩॥

॥ ગજલક્ષ્મી ॥

જયજય દુર્ગતિનાશિનિ કામિનિ
    સર્વફલપ્રદ શાસ્ત્રમયે ।
રથગજ તુરગપદાદિ સમાવૃત
    પરિજનમણ્ડિત લોકનુતે ॥

હરિહર બ્રહ્મ સુપૂજિત સેવિત
    તાપનિવારિણિ પાદયુતે ।
જયજય હે મધુસૂદન કામિનિ
    ગજલક્ષ્મિ રૂપેણ પાલય મામ્ ॥ ૪॥

॥ સન્તાનલક્ષ્મી ॥

અહિખગ વાહિનિ મોહિનિ ચક્રિણિ
    રાગવિવર્ધિનિ જ્ઞાનમયે ।
ગુણગણવારિધિ લોકહિતૈષિણિ
    સ્વરસપ્ત ભૂષિત ગાનનુતે ॥

સકલ સુરાસુર દેવમુનીશ્વર
    માનવવન્દિત પાદયુતે ।
જયજય હે મધુસૂદન કામિનિ
    સન્તાનલક્ષ્મિ ત્વં પાલય મામ્ ॥ ૫॥

॥ વિજયલક્ષ્મી ॥

જય કમલાસનિ સદ્ગતિદાયિનિ
    જ્ઞાનવિકાસિનિ ગાનમયે ।
અનુદિનમર્ચિત કુઙ્કુમધૂસર-
    ભૂષિત વાસિત વાદ્યનુતે ॥

કનકધરાસ્તુતિ વૈભવ વન્દિત
    શઙ્કર દેશિક માન્ય પદે ।

જયજય હે મધુસૂદન કામિનિ
　　વિજયલક્ષ્મિ સદા પાલય મામ્ ॥ ૬॥

॥ વિદ્યાલક્ષ્મી ॥

પ્રણત સુરેશ્વરિ ભારતિ ભાર્ગવિ
　　શોકવિનાશિનિ રત્નમયે ।
મણિમયભૂષિત કર્ણવિભૂષણ
　　શાન્તિસમાવૃત હાસ્યમુખે ॥

નવનિધિદાયિનિ કલિમલહારિણિ
　　કામિત ફલપ્રદ હસ્તયુતે ।
જયજય હે મધુસૂદન કામિનિ
　　વિદ્યાલક્ષ્મિ સદા પાલય મામ્ ॥૭॥

॥ ધનલક્ષ્મી ॥

ધિમિધિમિ ધિંધિમિ ધિંધિમિ ધિંધિમિ
　　દુન્દુભિ નાદ સુપૂર્ણમયે ।
ઘુમઘુમ ઘુંઘુમ ઘુંઘુમ ઘુંઘુમ
　　શઙ્ખનિનાદ સુવાદ્યનુતે ॥

વેદપુરાણેતિહાસ સુપૂજિત
　　વૈદિકમાર્ગ પ્રદર્શયુતે ।
જયજય હે મધુસૂદન કામિનિ
　　ધનલક્ષ્મિ રૂપેણ પાલય મામ્ ॥ ૮॥

*Ashta-Laxmi Stotra*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*